**Series ωZWYX**

**Set-4**

**प्रश्न-पत्र कोड**
**Q.P. Code 52**

रोल नं.
Roll No.

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Q.P. Code on the title page of the answer-book.

# संस्कृतम्

# SANSKRIT

*अवधि : होरात्रयम्* | *पूर्णाङ्काः : **80***

*निर्धारित समय : **3** घण्टे* | *अधिकतम अंक : **80***

*Time allowed : **3** hours* | *Maximum Marks : **80***

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **15** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए प्रश्न-पत्र कोड को परीक्षार्थी उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **18** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।

- Please check that this question paper contains **15** printed pages.
- Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **18** questions.
- **Please write down the serial number of the question in the answer-book before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

***सामान्य निर्देशा:***

*अस्मिन् प्रश्नपत्रे **चत्वार:** खण्डाः सन्ति —*

| | | | |
|---|---|---|---|
| ***खण्डः 'क'*** | – | *अपठित-अवबोधनम्* | – *10 अङ्काः* |
| ***खण्डः 'ख'*** | – | *रचनात्मक-कार्यम्* | – *15 अङ्काः* |
| ***खण्डः 'ग'*** | – | *अनुप्रयुक्त-व्याकरणम्* | – *25 अङ्काः* |
| ***खण्डः 'घ'*** | – | *पठित-अवबोधनम्* | – *30 अङ्काः* |

*अस्मिन् प्रश्नपत्रे **18** प्रश्नाः सन्ति ।*

***General Instructions :***

*Read the following instructions carefully and follow :*

1. *This question paper contains **four** sections – Unseen Passage, Creative Writing Skill, Applied Grammar and Text-books.*
2. *Section A (Unseen Passage) contains four parts and attempt all parts with choice as given there, based on specific instructions given in the question itself.*
3. *Section B (Creative Writing Skill) contains three questions. Attempt all three questions based on specific instructions given in the question itself.*
4. *Section C (Applied Grammar) contains seven questions which choice as given there. Attempt all seven questions based on specific instructions given in the question itself.*
5. *Section D (Text-Books Based Question) contains seven questions with choice as given there. Attempt all seven questions based on the specific instructions given in the question itself.*

## खण्डः 'क' *10*

## अपठित-अवबोधनम्

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत । *10*

अस्माकम् देश: प्राचीनकालादेव प्राकृतिक-पर्यावरणस्य पोषक: । वैदिककाले यद्यपि पर्यावरणस्य प्रदूषणस्य समस्या नासीत् तथापि वेदेषु स्थाने-स्थाने ऋषीणां पर्यावरणविषयकं चिन्तनं दृश्यते । अद्य पर्यावरण-प्रदूषणं संसारस्य भीषणतमा समस्या वर्तते, परं जना: अस्या: गाम्भीर्यं न अनुभवन्ति । पर्यावरणं रक्षणीयं वृक्षा: रोपणीया: रक्षणीया: च इति शृण्वन्त: उद्घोषयन्त: अपि वयं प्रतिदिनं तेषां कर्तनं पश्याम: । 'प्लास्टिक' इति रसायनेन निर्मितवस्तूनि पर्यावरणाय हानिकराणि इति जानन्त: अपि जना: एतेषां प्रयोगं बाहुल्येन कुर्वन्ति । पर्यावरणप्रदूषकं धूमं क्षिपतां वाहनानाम् औद्योगिक-यन्त्रागाराणां सङ्ख्या निरन्तरं वर्धमाना अस्ति । यद्यपि विकासाय नवीना: आविष्कारा:, अपेक्षिता: परं सञ्चाराय विस्तृता: सुरक्षिता: मार्गा: जनानां कृते अपि आवश्यका: एव । यदि पर्यावरणं प्राणिजीवनाय अनुकूलं न भविष्यति तर्हि पृथिव्यां जीवनमेव असम्भवं भविष्यति तदा भौतिकनिकासेन किम् ! अत: सर्वकार: जनसहयोगेन सर्वथा पर्यावरणरक्षणाय यत्नशील: भवेदिति ।

(अ) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) *2×1=2*

(i) के रोपणीयाः रक्षणीयाः च ?

(ii) कदा पर्यावरणस्य प्रदूषणस्य समस्या नासीत् ?

(iii) अस्माकं देशः कस्य पोषकः ?

(ब) पूर्णवाक्येन लिखत – (केवलं प्रश्नद्वयम्) *2×2=4*

(i) किं जानन्तः जनाः प्लास्टिक-निर्मितवस्तूनां प्रयोगं बाहुल्येन कुर्वन्ति ?

(ii) यदि पर्यावरणं प्राणिजीवनाय अनुकूलं न भविष्यति तर्हि किं भविष्यति ?

(iii) केषां सङ्ख्या निरन्तरं वर्धमाना अस्ति ?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । *1*

(द) यथानिर्देशम् उत्तरत – (केवलं प्रश्नत्रयम्) *3×1=3*

(i) 'जनाः अस्याः गाम्भीर्यं न अनुभवन्ति' अत्र किं क्रियापदम् ?

(a) जनाः

(b) अत्र

(c) अस्याः

(d) अनुभवन्ति

(ii) 'नवीनाः' इति विशेषणपदस्य विशेष्यपदं किम् ?

(a) जनाः

(b) आविष्काराः

(c) अपेक्षिताः

(d) मार्गाः

(iii) 'शोषकः' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?

(a) विषयः

(b) चिन्तनीयः

(c) सरलः

(d) पोषकः

(iv) 'वयं प्रतिदिनं तेषां कर्तनं पश्यामः ।' अस्मिन् वाक्ये 'पश्यामः' क्रियायाः कर्तृपदं किं प्रयुक्तम् ?

(a) वयम्

(b) तेषाम्

(c) प्रतिदिनम्

(d) कर्तनम्

## खण्डः 'ख'

## रचनात्मक-कार्यम्

**2.** भवती प्रभा अस्ति । स्वमातरं प्रति स्वस्वास्थ्यविषये लिखितम् इदं पत्रं मञ्जूषायाः सहायतया पुनः सम्पूर्णं लिखतु । $10\times\frac{1}{2}=5$

विद्यालयपरिसरः

(i) ____________

समादरणीयाः (ii) __________,

सादरं प्रणामाः ।

अत्र कुशलं तत्रास्तु । सम्प्रति मम (iii) __________ परीक्षा सञ्चरति । अत्र छात्रावासे पठनस्य वातावरणं तु शोभनं वर्तते । अत्र अध्यापकाः अपि च अतीव कर्मठाः सन्ति । अतः पठनस्य कार्यं (iv) __________ एव भवति, परन्तु अध्ययनकारणात् शयनस्य भोजनस्य च (v) __________ एव न प्राप्यते । अतः अद्यत्वे मम (vi) __________ सुष्ठु नास्ति । अहं (vii) __________ पीडिता अस्मि । परं काचिद् अपि (viii) __________ नैव करणीया । आशासे अहं शीघ्रमेव पूर्णतया स्वस्था भविष्यामि । परीक्षायाः अनन्तरं (ix) __________ आगमिष्यामि । तदा वयं मिलित्वा भ्रमणाय वाराणसीनगरं गमिष्यामः । पित्रे (x) ____________ ।

भवत्याः पुत्री

प्रभा

**मञ्जूषा**

| |
|---|
| वार्षिकी, शिमलातः, ज्वरेण, मातृचरणाः, गृहम्, स्वास्थ्यम्, समुचितम्, नमः, समयः, चिन्ता । |

3. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया **पञ्च** वाक्यानि संस्कृतेन लिखत । *5×1=5*



**मञ्जूषा**

| |
|---|
| उद्यानम्, धावतः, जनौ, वातावरणम्, नगरस्य, महिला, वृक्षाः, साधारणम्, विशालभवनानि, बसस्थानम्, स्वच्छम्, प्रतीक्षाम्, तिष्ठन्ति, अवकरपात्रम् । |

**अथवा**

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य न्यूनातिन्यूनं **पञ्चभिः** संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत । *5×1=5*

**'वृक्षाः अस्माकं मित्राणि'**

**मञ्जूषा**

| |
|---|
| वृक्षाः, सत्पुरुषाः, परोपकारम्, छाया, फलानि, पुष्पाणि, जनाः, पवनः, काष्ठम्, शीतलः, स्वास्थ्याय, आवश्यकम्, पथिकः, आनन्दम्, अनुभवन्ति, भूमेः संरक्षणम्, वर्षा, पक्षिभ्यः वासः । |

**4.** अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत । (केवलं वाक्य**पञ्च**कम्) *5×1=5*

(i) कल तुम कहाँ गए थे ?
Where did you go yesterday ?

(ii) घर के बाहर मत खेलो ।
Do not play outside the home.

(iii) भारत ऋषियों की भूमि है ।
Bharat is the land of saints.

(iv) हमारा जीवन अनुशासित होना चाहिए ।
Our life should be disciplined.

(v) मैं अपने जन्मदिन पर देवालय जाऊँगा ।
I will go to the temple on my birthday.

(vi) हम बाग में खेलते हैं ।
We play in the garden.

(vii) बालक मित्रों के साथ पढ़ता है ।
The child studies with friends.

## खण्डः 'ग' *25*

## अनुप्रयुक्त-व्याकरणम्

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत । (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) क्रुद्धः सिंहः इतस्ततः धावति ।

(ii) प्रकृतिः + एव शरणम् ।

(iii) उदीरितः + अर्थः पशुनापि गृह्यते ।

(iv) अचिरादेव चण्डवातेन सह प्रवर्षः समजायत ।

(v) माम् नय अस्मात् + नगरात् बहुदूरम् ।

**6.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत ।
(केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) स: <u>भारवेदनया</u> क्रन्दति स्म ।
(a) भारम् वेदनया
(b) भारस्य वेदनया
(c) भारेण वेदनया
(d) भाराय वेदनया

(ii) प्रस्तरतले <u>लतातरुगुल्मा</u> मे भवन्तु पिष्टा: ।
(a) लता च तरु: च
(b) लता च तरव: च
(c) लता: च गुल्मा: च
(d) लता: च तरव: च गुल्मा: च

(iii) <u>रामस्य समीपम्</u> उपसृत्य प्रणम्य च ।
(a) उपरामम्
(b) उपरामेण
(c) उपराम:
(d) उपरामस्य

(iv) को भेद: <u>पिक: च काक: च तयो:</u> ।
(a) पिककाकम्
(b) पिककाकयो:
(c) पिककाकस्य
(d) पिककाका:

(v) <u>विमूढधी:</u> मधुरं न वदति ।
(a) विमूढा धी:
(b) विमूढ: धी:
(c) विमूढा: धिय:
(d) विमूढा धी: यस्य स:

**7.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत : (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) भगवान् वाल्मीकि: वधू: इति ।

(a) भग + वन्

(b) भग + मतुप्

(c) भग + वतुप्

(d) भग + क्तवतु

(ii) सर्वेषामेव मत्कृते महत् + त्व विद्यते ।

(a) महत्ता

(b) महत्त्वम्

(c) महत्त्व:

(d) महात्वम्

(iii) किं नामधेया युवयोर्जननी ।

(a) नामधेय + तल्

(b) नामधेय + त्व

(c) नामधेय + कत्वा

(d) नामधेय + टाप्

(iv) देशस्य सेवा सर्वेषां नीति + ठक् कर्तव्यम् भवेत् ।

(a) नैतिकम्

(b) नैतिकी

(c) नैतिक:

(d) नैतिक

(v) नृत्यातिरिक्तं का तव विशेषता ?

(a) विशेष + टाप्

(b) विशेष + क्त

(c) विशेष + तल्

(d) विशेष + क्तवतु

**8.** वाच्यानुसारं उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत : (केवलं प्रश्नत्रयम्) *3×1=3*

(i) मोहनः – रमे ! किं तत्र शालायाम् गायकः गीतानि गायति ।
रमा – आम्, तत्र गायकेन गीतानि ________ ।

(a) गायति
(b) गायन्ति
(c) गीयन्ते
(d) गीयते

(ii) मोहनः – किं कापि बाला तत्र नृत्यति ?
रमा – आम्, तत्र तु द्वे बाले ________ ।

(a) नृत्यति
(b) नृत्यतः
(c) नर्तिष्यतः
(d) नृत्यन्ति

(iii) मोहनः – किम् इदानीं त्वम् अपि तत्र गच्छसि ?
रमा – आम्, ________ अपि तत्र गम्यते ।

(a) अहम्
(b) वयम्
(c) मया
(d) त्वया

(iv) मोहनः – अरे ! गुरुः आयाति । अहं तु ________ प्रणमामि ।

(a) गुरुम्
(b) गुरुः
(c) गुरवे
(d) गुरोः

**9.** कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत : (केवलं प्रश्नचतुष्टयम्) : *4×1=4*

(i) अहं नित्यं रात्रौ (8:30) भोजनं करोमि ।

(ii) तदन्तरं (8:45) भ्रमणाय गच्छामि ।

(iii) तदा (9:30) मनोरञ्जनाय दूरदर्शनं पश्यामि ।

(iv) दूरदर्शनं दृष्ट्वा (10:00) पठनं करोमि ।

(v) रात्रौ (11:15) अहं स्वपिमि ।

**10.** मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत : (केवलं त्रयम्) *3×1=3*

(i) ते सभायां __________ मा वदेयुः ।

(ii) यदि त्वं मां मुक्त्वा यासि __________ वेलाप्यवेला स्यात् ।

(iii) यूयम् __________ प्रयासं कुरुत ।

(iv) मार्गेषु __________ अवकरं न क्षिपेयुः ।

**मञ्जूषा**

| |
|---|
| तदा, इतस्ततः, वृथा, अपि । |

**11.** अधोलिखितवाक्येषु रेखाङ्कित – अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत । (केवलं प्रश्नत्रयम्) *3×1=3*

(i) <u>पवनं</u> वेगेन वहति ।
   (a) पवन
   (b) पावनम्
   (c) पवनः
   (d) पवनेन

(ii) अहं आम्रं <u>खादति</u> ।
   (a) खादामि
   (b) खादतः
   (c) खादसि
   (d) खादामः

(iii) मोहन: गृहं तत्रास्ति ।

(a) मोहनम्

(b) मोहनात्

(c) मोहने

(d) मोहनस्य

(iv) भवान् श्व: कुत्र गच्छति ?

(a) गमिष्यति

(b) अगच्छत्

(c) गच्छतु

(d) आगमिष्यति

## खण्डः 'घ' *30*

## पठित-अवबोधनम्

**12.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत । *5*

कश्चन निर्धनो जन: भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान् । तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जात: । तत्तनय: तत्रैव छात्रावासे निवसन् अध्ययने संलग्न: समभूत् । एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जात: पुत्रं द्रष्टुं च प्रस्थित: । परमर्थकार्श्येन पीडित: स बसयानं विहाय पदातिरेव प्राचलत् । पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत् । निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा 'इति विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कश्चिद् गृहस्थमुपागत: ।
करुणापरो गृही तस्मै आश्रयं प्रायच्छत् ।

(i) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) कीदृश: जन: भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान् ?

(ख) तनय: कुत्र निवसन् अध्ययने संलग्न: समभूत् ?

(ग) करुणापरो गृही कस्मै आश्रयं प्रायच्छत् ?

(ii) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) स पिता किमर्थं व्याकुलो जात: ?

(ख) स: किं विचार्य पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कश्चिद् गृहस्थमुपागत: ?

(ग) अर्जितेन वित्तेन स: जन: किम् अकरोत् ?

(iii) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) "परमर्थकार्श्येन पीडितः सः बसयानं विहाय पदातिरेव प्राचलत्" अत्र वाक्ये कर्तृपदं किम् ?

(ख) 'करुणापरः' इति विशेषणपदस्य विशेष्यपदं किम् ?

(ग) 'पुत्रस्य' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

**13.** अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत । *5*

वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम् ।
कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम् ।।
करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम् । शुचि ...।।

(i) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) जलं कीदृशं न अस्ति ?

(ख) समलं किम् अभवत् ?

(ग) भृशं दूषितं किम् अस्ति ?

(ii) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) मनुष्यैः कि करणीयम् ?

(ख) भक्ष्यं कीदृशं जातम् ?

(ग) शुद्धीकरणं कुत्र करणीयम् ?

(iii) भाषिककार्यम् – (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) 'बहु' इति पदस्य पर्यायपदं किमस्ति ?

(ख) 'अन्तर्' इति पदस्य विपर्ययपदं किम् ?

(ग) 'जलम्' इति पदस्य विशेषणपदं किम् ?

**14.** अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत । *5*

(एतस्मिन्नेव काले व्याघ्रचित्रकौ अपि नदीजलं पातुमागतौ एतं विवादं श्रुणुतः वदतः च)

*व्याघ्रचित्रकौ* – अरे किं वनराजपदाय सुपात्रं चीयते ? एतदर्थं तु आवामेव योग्यौ ! यस्य कस्यापि चयनं कुर्वन्तु सर्वसम्मतया ।

*सिंहः* – तूष्णीं भव भोः । युवामपि मत्सदृशौ भक्षकौ न तु रक्षकौ । एते वन्यजीवाः भक्षकं रक्षकपदयोग्यं न मन्यन्ते अतएव विचारविमर्शः प्रचलति ।

*बक:* – सर्वथा सम्यगुक्तम् सिंहमहोदयेन । वस्तुत: एव सिंहेन बहुकालपर्यन्तं शासनं कृतम् परमधुना तु कोऽपि पक्षी एव राजेति निश्चेतव्यम् अत्र तु संशीतिलेशस्यस्यापि अवकाश: एव नास्ति ।

*सर्वे पक्षिण:* – आम् आम् – कश्चित् खग: एव वनराज: भविष्यति इति ।

(i) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) *$2\times\frac{1}{2}=1$*

(क) कौ नदीजलं पातुमागतौ ?

(ख) 'तूष्णीं भव' इति क: कथयति ?

(ग) किमर्थं सुपात्रं चीयते ?

(ii) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) *$2\times1=2$*

(क) तत्र किमर्थं विचारविमर्श: प्रचलति ?

(ख) अधुना किं निश्चेतव्यम् ?

(ग) सर्वे पक्षिण: किं कथयन्ति ?

(iii) भाषिककार्यम् – *$2\times1=2$*

(क) 'एतस्मिन्नेव काले व्याघ्रचित्रकौ अपि नदीजलं पातुम् आगतौ' वाक्ये किं कर्तृपदम् प्रयुक्तम् ?

(ख) 'पक्षिण:' इति विशेष्यपदस्य विशेषणपदं किम् ?

(ग) 'कलहम्' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

**15.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत । (केवलं प्रश्नचतुष्टयम्) *$4\times1=4$*

(i) आत्मकल्याणम् इच्छन् नर: कदापि <u>परेषाम्</u> अहितं कर्म न कुर्यात् ।

(ii) अयम् <u>अन्येभ्यो</u> दुर्बल: ।

(iii) पुरा त्वया <u>मह्यं</u> व्याघ्रत्रयं दत्तम् ।

(iv) <u>चातक:</u> वने वसति ।

(v) तपोवनवासिन: जननीं <u>देवीनाम्ना</u> आह्वयन्ति ।

**16.** मञ्जूषाया: सहायतया अधोलिखितश्लोकस्य अन्वयं पूरयत । *4×1=4*

मृगा मृगैः सङ्गमनुव्रजन्ति,
गावश्च गोभिः तुरगास्तुरङ्गैः ।
मूर्खाश्च मूर्खैः सुधियः सुधीभिः,
समान-शील-व्यसनेषु सख्यम् ।।

**अन्वयः –**

मृगाः (i) _________ गावश्च गोभिः (ii) _________ तुरङ्गैः, मूर्खाः मूर्खैः, सुधियः सुधीभिः सङ्गम् (iii) __________ । (iv) __________ समान-शील व्यसनेषु (भवति) ।

**मञ्जूषा**

| सख्यम्, मृगैः, तुरगाः, सङ्गम् । |
|---|

**अथवा**

अधोलिखितश्लोकस्य भावार्थं मञ्जूषातः उचितपदानि चित्वा पूरयत । *4×1=4*

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः ।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः ।।

**भावार्थः –**

अस्य भावोऽस्ति यत् सदाचारः जनानां (i) _________ धर्मः अस्ति, इति (ii) __________ कथयन्ति अतएव जनैः (iii) ___________ रक्षा प्राणेभ्यः अपि (iv) __________ करणीया ।

**मञ्जूषा**

| विद्वांसः, विशेषतया, प्रथमः, सदाचारस्य । |
|---|

**17.** अधोलिखितानि वाक्यानि घटनाक्रमानुसारं संयोज्य पुनः लिखत । $8\times\frac{1}{2}=4$

(i) व्याघ्रः तां व्याघ्रमारीं मत्वा अधावत् ।

(ii) तस्य भार्या बुद्धिमती आसीत् ।

(iii) मार्गे सा एकं व्याघ्रं ददर्श ।

(iv) बुद्धिमती व्याघ्रजाद् भयात् मुक्ताऽभवत् ।

(v) तत्र राजसिंहः नाम राजपुत्रः वसति स्म ।

(vi) अस्ति देउलाख्यो नाम ग्रामः ।

(vii) सा पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता ।

(viii) सा वाक्चातुर्येण बुद्धेः च प्रयोगेन व्याघ्रं भयभीतं कृतवती ।

**18.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत । (केवलं प्रश्नत्रयम्) *3×1=3*

(i) एकः दुर्बलः बलीवर्दः भूमौ पपात ।

(a) गौः (b) धेनुः

(c) वृषभः (d) महिषः

(ii) तदा तत्र सुराधिपः आगच्छत् ।

(a) नृपः (b) कृषकः

(c) धेनुः (d) इन्द्रः

(iii) नराणां प्रथमः शत्रुः आलस्यम् अस्ति ।

(a) मानवः (b) मित्रम्

(c) रिपुः (d) सहायकः

(iv) फलच्छायासमन्वितः वृक्षः सेवितव्यः ।

(a) तरुः (b) खगः

(c) छाया (d) मानवः

अंक-योजना (Marking Scheme) X Class 2023

संस्कृतम् ( Sanskrit)

| | |
|---|---|
| **Marking Scheme Strictly Confidential (For Internal and Restricted use only)**<br>**Senior School Certificate Examination, 2023**<br>Series ωZWYX (QP **Code 52**) Set 4 | |
| **General Instructions: -** | |
| **1** | You are aware that evaluation is the most important process in the actual and correct assessment of the candidates. A small mistake in evaluation may lead to serious problems which may affect the future of the candidates, education system and teaching profession. To avoid mistakes, it is requested that before starting evaluation, you must read and understand the spot evaluation guidelines carefully. |
| **2** | **"Evaluation policy is a confidential policy as it is related to the confidentiality of the examinations conducted, Evaluation done and several other aspects. Its' leakage to public in any manner could lead to derailment of the examination system and affect the life and future of millions of candidates. Sharing this policy/document to anyone, publishing in any magazine and printing in News Paper/Website etc may invite action under various rules of the Board and IPC."** |
| **3** | Evaluation is to be done as per instructions provided in the Marking Scheme. It should not be done according to one's own interpretation or any other consideration. Marking Scheme should be strictly adhered to and religiously followed. **However, while evaluating, answers which are based on latest information or knowledge and/or are innovative, they may be assessed for their correctness otherwise and due marks be awarded to them. In class-X, while evaluating two competency-based questions, please try to understand given answer and even if reply is not from marking scheme but correct competency is enumerated by the candidate, due marks should be awarded.** |
| **4** | The Marking scheme carries only suggested value points for the answers<br>These are in the nature of Guidelines only and do not constitute the complete answer. The students can have their own expression and if the expression is correct, the due marks should be awarded accordingly. |
| **5** | The Head-Examiner must go through the first five answer books evaluated by each evaluator on the first day, to ensure that evaluation has been carried out as per the instructions given in the Marking Scheme. If there is any variation, the same should be zero after delibration and discussion. The remaining answer books meant for evaluation shall be given only after ensuring that there is no significant variation in the marking of individual evaluators. |
| **6** | Evaluators will mark( √ ) wherever answer is correct. For wrong answer CROSS 'X" be marked. Evaluators will not put right (✓)while evaluating which gives an impression that answer is correct and no marks are awarded. **This is most common mistake which evaluators are committing.** |
| **7** | If a question has parts, please award marks on the right-hand side for each part. Marks awarded for different parts of the question should then be totaled up and written in the left-hand margin and encircled. This may be followed strictly. |
| **8** | If a question does not have any parts, marks must be awarded in the left-hand margin and encircled. This may also be followed strictly. |
| **9** | If a student has attempted an extra question, answer of the question deserving more marks should be retained and the other answer scored out with a note **"Extra Question"**. |
| **10** | No marks to be deducted for the cumulative effect of an error. It should be penalized only once. |
| **11** | A full scale of marks _________(example 0 to 80/70/60/50/40/30 marks as given in Question Paper) has to be used. Please do not hesitate to award full marks if the answer deserves it. |
| **12** | Every examiner has to necessarily do evaluation work for full working hours i.e., 8 hours every day and evaluate 20 answer books per day in main subjects and 25 answer books per day in other subjects (Details are given in Spot Guidelines).This is in view of the reduced syllabus and number of questions in question paper. |
| **13** | Ensure that you do not make the following common types of errors committed by the Examiner in the past:-<br>● Leaving answer or part thereof unassessed in an answer book.<br>● Giving more marks for an answer than assigned to it.<br>● Wrong totaling of marks awarded on an answer.<br>● Wrong transfer of marks from the inside pages of the answer book to the title page.<br>● Wrong question wise totaling on the title page.<br>● Wrong totaling of marks of the two columns on the title page.<br>● Wrong grand total.<br>● Marks in words and figures not tallying/not same.<br>● Wrong transfer of marks from the answer book to online award list.<br>● Answers marked as correct, but marks not awarded. (Ensure that the right tick mark is correctly and clearly indicated. It should merely be a line. Same is with the X for incorrect answer.)<br>● Half or a part of answer marked correct and the rest as wrong, but no marks awarded. |
| **14** | While evaluating the answer books if the answer is found to be totally incorrect, it should be marked as cross (X) and awarded zero (0)Marks. |
| **15** | Any un assessed portion, non-carrying over of marks to the title page, or totaling error detected by the candidate shall damage the prestige of all the personnel engaged in the evaluation work as also of the Board. Hence, in order to uphold the prestige of all concerned, it is again reiterated that the instructions be followed meticulously and judiciously. |
| **16** | The Examiners should acquaint themselves with the guidelines given in the "**Guidelines for spot Evaluation**" before starting the actual evaluation. |
| **17** | Every Examiner shall also ensure that all the answers are evaluated, marks carried over to the title page, correctly totaled and written in figures and words. |
| **18** | The candidates are entitled to obtain photocopy of the Answer Book on request on payment of the prescribed processing fee. All Examiners/Additional Head Examiners/Head Examiners are once again reminded that they must ensure that evaluation is carried out strictly as per value points for each answer as given in the Marking Scheme. |

कृपया ध्यान दीजिएः

1। कुछ प्रश्नों के विकल्पात्मक उत्तर भी हो सकते हैं। इस अंक योजना में दिए गए उत्तर सुझावात्मक हैं। इनके अतिरिक्त भी संदर्भानुसार सही उत्तर हो सकते हैं, अतः अंक दिए जाएँ।

2। अनुच्छेद अथवा श्लोकों पर आधारित प्रश्न अवबोधनात्मक हैं। विद्यार्थी अनुच्छेद में दिए गए शब्दों के स्थान पर पर्यायवाची शब्दों का प्रयोग भी कर सकते हैं इसके लिए भी अंक दिए जाएँ। विद्यार्थी उत्तर देते समय उपयुक्त विभक्ति अथवा वचन का प्रयोग नहीं करते हैं तो अंशतः अंक काटे जाएँ संपूर्ण नहीं।

3। त्रुटिपूर्ण वर्तनी अथवा व्याकरणात्मक प्रयोगों के लिए अनुपाततः अंक काटे जाएँ न कि पूरे अंक।

4। आंशिक दृष्टि से सही उत्तरों के लिए भी अंशतः अंक अवश्य दिए जाएँ।

5। खण्ड 'ख' में (रचनात्मकं कार्यम्) के अन्तर्गत 'चित्र वर्णन' व 'अनुच्छेद लेखन' में विकल्प समझा जाए। बच्चों ने जो भाग भी किया हो अंक दिए जाएँ। वाक्य संरचना प्रमुख है न कि वाक्य का सौंदर्य तत्त्व। आंशिक वाक्य-शुद्धता के लिए भी अंक दिए जाएँ।

6। जिन प्रश्नों में बच्चों को उत्तर लिखने के लिए अतिरिक्त प्रश्न दिए गए है वहाँ किसी भी क्रम में प्रश्नों के सही उत्तर लिखने पर अङ्क दिए जाएँ। जैसेः- दिए गए 3 प्रश्नों में से किन्हीं भी 2 सही उत्तरों पर अङ्क दिए जाएँ चाहे 3 में से पहला उत्तर गलत ही हो , अन्तिम दो प्रश्नों को सही माना जाए।

## संकेतात्मक उत्तर व अंक विभाजन ः

## खण्डः 'क' (Section-A)(अपठित अवबोधनम्) 10

1 (अ) एकपदेन उत्तरत- प्रत्येक प्रश्न के लिए 1 अंक। (केवलं प्रश्नद्वयम्) **1×2=2**

(i) वृक्षाः
(ii) वैदिककाले /प्राचीनकाले
(iii) प्राकृतिक-पर्यावरणस्य / पर्यावरणस्य

(ब) पूर्णवाक्येन उत्तरत - प्रत्येक प्रश्न के लिए 2 अंक। (केवलं प्रश्नद्वयम्) **2×2=4**

(i) 'प्लास्टिक' इति रसायनेन.... हानिकराणि ।
(ii) ....पृथिव्यां जीवनमेव असम्भवं भविष्यति।
(iii) ....पर्यावरणप्रदूषकं धूमं क्षिपतां...... अस्ति।

(स) 'पर्यावरणप्रदूषणम्' अथवा अन्य उपयुक्त शीर्षक। **1**

(द) यथानिर्देशम् उत्तरत-प्रत्येक भाग के लिए 1 अंक। (केवलं प्रश्नत्रयम्) **3×1=3**

(ii) d अनुभवन्ति (iii) b आविष्काराः (iii) d पोषकः (iii) a वयम्

## खण्डः 'ख' (Section-B)(रचनात्मकं कार्यम्) 15

2 पत्रलेखनम् - 10 रिक्तस्थान ।प्रत्येकभाग के लिए ½ अंक। **10×½=5**

(i) शिमलातः (ii) मातृचरणाः (iii) वार्षिकी (iv) समुचितम् (V) समयः

(vi) स्वास्थ्यम् (vii) ज्वरेण (viii) चिन्ता (ix) गृहम् (x) नमः

3 **चित्रवर्णनम् अथवा अनुच्छेदलेखनम्** **5×1=5**

बच्चों से सरल,संक्षिप्त वाक्य पूर्ति अपेक्षित है। केवल वाक्य की शुद्धता देखी जाए। इस प्रश्न का प्रमुख उद्देश्य वाक्य रचना है। वाक्य लघु अथवा दीर्घ हो यह महत्वपूर्ण नहीं। व्याकरणिक दृष्टि से शुद्ध होने पर पूर्ण अंक दिए जाएँ ।मंजूषा में दिए गए शब्द सहायतार्थ हैं, बच्चे शब्द चुने अथवा नहीं -आवश्यक नहीं।वे स्वयं शब्दों का प्रयोग कर वाक्य -निर्माण कर सकते हैं। बच्चे स्वयं भी मंजूषा में दिए गए शब्दों की विभक्तियाँ आदि भी बदल सकते हैं अतः अंक दिए जाएँ। त्रुटियों के अंक अंशतः काटे जाएँ। पूर्णतया शुद्ध होने पर ही 5 अंक दिए जाएँ। प्रत्येक वाक्य के लिए 1 अंक है।

अथवा (OR) **अनुच्छेदलेखनम्**

यह विकल्प **सबके लिए** दिया गया है। बच्चे स्वयं भी मंजूषा में दिए गए शब्दों की विभक्तियाँ आदि बदल सकते हैं। अंक दिए जाएँ। इस प्रश्न के 5 अंक हैं। प्रत्येक वाक्य के लिए 1 अंक है।

**4 संस्कृत अनुवाद** के प्रश्न में बच्चे संस्कृत में पर्यायवाची शब्दों का प्रयोग कर सकते हैं , अतः अङ्क दिए जाएँ। त्रुटिपूर्ण वर्तनी अथवा व्याकरणात्मक प्रयोगों के लिए अनुपाततः अङ्क काटे जाएँ। आंशिक रूप से सही उत्तरों के लिए भी अंशतः अङ्क अवश्य दिए जाएँ। अनुवाद करने के लिए बच्चे हिन्दी या अंग्रेज़ी के वाक्य को आधार बना सकते हैं इसका ध्यान रखा जाए। प्रत्येक भाग के लिए 1 अङ्क।

(केवलं वाक्यपञ्चकम्) **5×1=5**

(i) ह्यः त्वं कुत्र अगच्छः।/गतवान् आसीत्। /गतवती आसीत् । / ह्यः यूयं कुत्र अगच्छत।
(ii) गृहात् बहिः मा क्रीड/खेल/ क्रीडत/खेलत।
(iii) भारतं ऋषीणां भूमिः / धरा अस्ति /वर्तते /विद्यते।
(iv) अस्माकं जीवनम् अनुशासितं भवेत्/ स्यात्/ भवितव्यम्।
(v) अहं स्व/मम/मदीये जन्मदिवसे देवालयं / मन्दिरं गमिष्यामि।
(vi) वयं उद्याने/वाटिकायां/उपवने क्रीडामः/खेलामः।
(vii) बालकः मित्रैः /सह/साकं/सार्धं/समं पठति।

## खण्डः 'ग' (Section-C)(अनुप्रयुक्त व्याकरणम्) 25 अंकाः

**5 संधि-संधिच्छेद -** **4×1=4**

आंशिक दृष्टि से सही उत्तर के लिए आंशिक अंक अवश्य दिए जाएँ। प्रत्येक के लिए 1 अंक है। (केवलं प्रश्नचतुष्टयम्)

(i) इतः+ततः (ii) प्रकृतिरेव (iii) उदीरितोऽर्थः (iv) अचिरात् +एव (v) अस्मान्नगरात्

**6 समास -** **4×1=4**

इस प्रश्न का मूल उद्देश्य 'समस्तपद' अथवा 'विग्रह' की समझ है। प्रत्येक भाग के लिए 1 अंक है। (केवलं प्रश्नचतुष्टयम्)

(i) b भारस्य वेदनया (ii) d लताः च तरवः च गुल्माः च (iii) a उपरामम्
(iv) b पिककाकयोः (v) d विमूढा धीः यस्य सः

**7 प्रकृति -प्रत्यय -** **4×1=4**

इस प्रश्न में बच्चे केवल उत्तर लिख सकते हैं। अतः पूर्ण अंक दिए जाएँ। प्रत्येक भाग के लिए 1 अंक है। (केवलं प्रश्नचतुष्टयम्)

(i) b भग +मतुप् (ii) b महत्त्वम् (iii) d नामधेय+टाप्
(iv) a नैतिकम् (v) c विशेष+तल्

**8 वाच्य -** **3×1=3**

इस प्रश्न में बच्चे केवल उत्तर लिख सकते हैं। अतः पूर्ण अंक दिए जाएँ। प्रत्येक भाग के लिए 1 अंक है। (केवलं प्रश्नत्रयम्)

(i)c गीयन्ते (ii)b नृत्यतः (iii)c मया (iv)a गुरुम्

**9 कालबोधक शब्द** **4×1=4**

इस प्रश्न में आंशिक दृष्टि से सही उत्तर के लिए आंशिक अंक अवश्य दिए जाएँ। प्रत्येक भाग के लिए 1 अंक है। (केवलं प्रश्नचतुष्टयम्)

(i) सार्ध-अष्ट (ii) पादोन-नव (iii) सार्ध-नव (iv) दश (v) सपाद-एकादश

**10 अव्यय** **3×1=3**

उत्तर विकल्पात्मक हो सकते हैं। प्रत्येक भाग के लिए 1 अंक है। (केवलं प्रश्नत्रयम्)

(i) वृथा/अपि (ii) तदा (iii) अपि (iv) इतस्ततः/अपि

**11 अशुद्धि संशोधन** **3×1=3**

इस प्रश्न में प्रत्येक रिक्तस्थान के लिए 1 अंक है। (केवलं प्रश्नत्रयम्)

(i) c पवनः (ii) a खादामि (iii) d मोहनस्य (iv) a गमिष्यति/ d आगमिष्यति

## खण्डः 'घ' (Section-Dपठित-अवबोधनम्) 30 अङ्काः

**12 गद्यांशं** इस प्रश्न का मूल उद्देश्य अवबोधन परीक्षण है । बच्चे पर्यायवाची शब्दों का प्रयोग कर सकते हैं। पूर्ण अंक दिए जाएँ। आंशिक उत्तर सही होने पर आंशिक अंक दिए जाएँ।

(i) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) प्रत्येकभाग के लिए ½ अंक। **2×½=1**

(क) निर्धनः /कश्चन (ख) छात्रावासे (ग) निर्धनजनाय/ जनकाय/ पित्रे/ तस्मै

(ii) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) प्रत्येकभाग के लिए 1 अंक। **2×1=2**

(क) ......तनूजस्य रुग्णतामाकर्ण्य (ख) ...निशान्धकारे प्रसृते विजने... शुभावहा (ग) ...महाविद्यालये प्रवेशं...

(iii) निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्) प्रत्येकभाग के लिए 1 अंक। **2×1=2**

(क) सः /पिता (ख) गृही (ग) तनूजस्य/ तनयस्य

**13 पद्यांशं** इस प्रश्न का मूल उद्देश्य अवबोधन परीक्षण है । बच्चे पर्यायवाची शब्दों का प्रयोग कर सकते हैं। पूर्ण अंक दिए जाएँ। आंशिक उत्तर सही होने पर आंशिक अंक दिए जाएँ।

(i) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) प्रत्येकभाग के लिए ½ अंक। **2×½=1**

(क) निर्मलम् (ख) धरातलम् (ग) वायुमण्डलम्

(ii) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) प्रत्येकभाग के लिए 1 अंक। **2×1=2**

(क) ...बहिरन्तर्जगति तु बहु शुद्धीकरणं...। (ख) ...कुत्सितवस्तुमिश्रितं...। (ग) ...जगति... /बहिरन्तर्जगति।

(iii) भाषिककार्यम् - (केवलं प्रश्नद्वयम्) प्रत्येकभाग के लिए 1 अंक। **2×1=2**

(क) भृशम् (ख) बहिः / बहिर् (ग) निर्मलम्

**14 नाट्यांशः** इस प्रश्न का मूल उद्देश्य अवबोधन परीक्षण है । बच्चे पर्यायवाची शब्दों का प्रयोग कर सकते हैं। पूर्ण अंक दिए जाएँ। आंशिक उत्तर सही होने पर आंशिक अंक दिए जाएँ।

(i) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) प्रत्येकभाग के लिए ½ अंक। **2×½=1**

(क) व्याघ्रचित्रकौ। (ख) सिंहः (ग) वनराजपदाय

(ii) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) प्रत्येकभाग के लिए 1 अंक। **2×1=2**

(क) ...भक्षकं रक्षकपदयोग्यं न मन्यन्ते... (ख) ...कोऽपि पक्षी एव राजेति... (ग) ...कश्चित् खगः... भविष्यति

(iii) भाषिककार्यम् - (केवलं प्रश्नद्वयम्) प्रत्येकभाग के लिए 1 अंक। **2×1=2**

(क) व्याघ्रचित्रकौ (ख) सर्वे (ग) विवादम्

**15 प्रश्ननिर्माण -संबंधी** इस प्रश्न में बच्चे केवल प्रश्नवाचक शब्द लिख सकते हैं। वर्तनी आदि की दृष्टि से अनुपाततः अंक काटे जाएँ न कि पूरे अंक। इस प्रश्न में अवबोधन प्रमुख है तथा विकल्पात्मक उत्तर हो सकते हैं। **4×1=4**

(i) केषाम् (ii) केभ्यः /केभ्यो (iii) कस्यै/कस्मै (iv) कः (v) केन /कथम् (केवलं प्रश्नचतुष्टयम्)

**16 अन्वय-संबंधी** बच्चे मञ्जूषा से केवल पद चुनकर भी लिख सकते हैं। प्रत्येकभाग के लिए 1 अंक। **4×1=4**

(i) मृगैः (ii) तुरगाः (iii) अनुव्रजन्ति/ सङ्गम् (iv) सख्यम्

**अथवा**

**भावार्थ-संबंधी** बच्चे मञ्जूषा से केवल पद चुनकर भी लिख सकते हैं। प्रत्येकभाग के लिए 1 अंक। **4×1=4**

(i) प्रथमः (ii) विद्वांसः (iii) सदाचारस्य (iv) विशेषतया

**17 <u>कथाक्रम -संबंधी</u>** इस प्रश्न के उत्तर में वाक्यों में तार्किक संबंध होना अपेक्षित है। प्रश्न बोधात्मक है स्मृति आधारित नहीं। केवल वाक्यक्रम लिखने पर भी अंक दिए जाएँ। वर्तनी आदि द्रष्टव्य नहीं। **$8 \times \frac{1}{2} = 4$**

1 (vi) अस्ति ............... ग्रामः।
2 (v) तत्र ............... स्म।
3 (ii) तस्य ............... आसीत्।
4 (vii) सा ............... चलिता।
5 (iii) मार्गे ............... ददर्श।
6 (viii) सा ............... कृतवती।
7 (i) व्याघ्रः ............... अधावत्।
8 (iv) बुद्धिमती ............... मुक्ताऽभवत्।

आंशिक उत्तर के लिए भी अंक दिए जाएँ।

**18 <u>शब्दार्थ -संबंधी</u>** इस प्रश्न में बच्चे उत्तर की क्रमसंख्या भी लिख सकते हैं। वर्तनी आदि की दृष्टि से अंक अंशतः ही काटे जाएँ। प्रत्येक भाग के लिए 1 अंक। **$3 \times 1 = 3$**

(i) c वृषभः (ii) d इन्द्रः (iii) c रिपुः (iv) a तरुः (केवलं प्रश्नत्रयम्)

*****